दिनाङ्क :- 14.02.2026

प्रात: - 06:55

## प्रधानमन्त्री-असम भ्रमणम्

प्रधानमन्त्री नरेन्द्रमोदी अद्य असमराज्यस्य यात्रायां भविष्यति। सः प्रातः सार्ध-दशवादने डिब्रुगढ-मण्डलस्य राष्ट्रियराजमार्गे मोरन बाईपास इत्यत्र स्थिते आपत्कालीन-अवरोहण-स्थानके विमानेन अवतरिष्यति, यत्र सः युद्धविमानैः, परिवहनविमानैः, उदग्रविमानैः सहितं विमानप्रदर्शनमपि द्रक्ष्यति । इदम् आपत्कालीन-अवरोहण-स्थानकम् पूर्वोत्तरभारते प्रथमम् अस्ति । सैन्य-नागरिक-विमानानाम् आपत्कालीन-अवरोहण-उड्डयनयोः सहायतायै, वायुसेनायाः समन्वयेन अस्य निर्माणम् कृतम् अस्ति । श्रीमोदी गुवाहाट्यां पञ्चाशदुत्तर-चतुश्शताधिक-पञ्चसहस्रतोऽप्यधिकमूल्यानां विविधानां विकास-परियोजनानाम् उद्घाटनं अपि करिष्यति ।

## प्रधानमन्त्री –ई-टी ::

प्रधानमन्त्रिणा नरेन्द्र मोदिना प्रोक्तं यत्, अनेकानां समस्यानां समाह्वानानां च मध्ये इदं दशकं भारतस्य कृते अपूर्वविकासस्य दशकम् अभवत् । प्रधानमन्त्री गतसायं नवदिल्ल्यां, इकानामिक्-टाइम्स नौ ग्लोबल बिजनेस समिट् इत्याख्यं सम्मेलनं सम्बोधयनासीत् ।

प्रधानमन्त्रिणा प्रोक्तम् यत्, यदा गतदशकं आरब्धम् आसीत् तदा भारतं एकादश-तमः बृहत्तमः अर्थव्यवस्था आसीत्, परन्तु अद्यत्वे देशः, विश्वस्य तृतीयबृहत्तम-अर्थव्यवस्था भवितुं द्रुतगत्या अग्रे गच्छति ।

प्रधानमन्त्री सेवा तीर्थ

प्रधानमन्त्री नरेन्द्रमोदी ह्यः नवदिल्ल्यां, सेवातीर्थ-परिसरस्य उद्घाटनं कृतवान् । एतत् प्रधानमन्त्रिणः नूतनं कार्यालयं भविष्यति। सेवातीर्थव्यवस्थायाः कार्यान्वयनानन्तरं प्रथमनिर्णयेषु सः प्रधानमन्त्रि-आपदुद्धार-योजनायाः अनुमोदनं कृतवान् । सेवातीर्थस्य उद्घाटनानन्तरं श्रीमोदी जनान् सम्बोधितवान्।

प्रधानमन्त्रिणा उक्तं यत् सेवातीर्थः, कर्तव्यभवने च भारतस्य विकसितराष्ट्रत्वस्य यात्रायां महत्त्वपूर्ण-उपलब्धयः सन्ति ।

पीयूष गोयल - राहुल गांधी

वाणिज्य-उद्योगमन्त्री पीयूषगोयलः काङ्ग्रेसनेत्रा राहुलगान्धिना कृत-आरोपानाम् खण्डनं कृत्वा तान् कृतकाः, कल्पिताः, मिथ्याः च इत्युक्तवान् । श्रीगोयलः भारत-अमेरिका-व्यापार-सन्धि-विषये राहुलगान्धिना प्रकाशितस्य दृश्य-प्रसारणस्य विषये प्रतिक्रियां ददाति स्म ।

हरियाणा-प्रधानमन्त्री ई बस सेवा

प्रधानमन्त्री मोदी, अद्य चण्डीगढस्य सेक्टर् त्रि-चत्वारिंशत् अन्तरराज्यबसटर्मिनल् (ISBT) इत्यत्र, प्रधानमन्त्री ई-बससेवायोजनायाः अन्तर्गतं नवीनविद्युत्बस-लोकयानानां कृते दृश्य-सम्मेलनद्वारा ध्वजं प्रदर्शयिष्यति। अवधेयमस्ति यत्, प्रधानमन्त्री ई-बससेवायोजना (PM-EBUS) द्विसहस्राब्दस्य त्रयोविंशति-तमस्य वर्षस्य अगस्तमासे आरब्धः केन्द्रसर्वकारस्य एकः उपक्रमः अस्ति ।

आयुष-उनानी मुम्बई

आयुष-मन्त्री प्रताप-राव-जाधवः अद्य मुम्बईनगरे यूनानी-चिकित्सा-क्षेत्रीय-संशोधन-संस्थानस्य नवीनीकरणकेन्द्रस्य उद्घाटनं करिष्यति। यूनानी-चिकित्सा-संशोधन-केन्द्रीय-परिषद्-द्वारा आयोजितस्य ऐषमः यूनानी-दिवस-उत्सवस्य, यूनानी-चिकित्सा-विषये, नवीनता-विषये, राष्ट्रिय-सम्मेलनस्य च भागरूपेण एषः कार्यक्रमः आयोजितः अस्ति ।

भारत एआइ शिखरसम्मेलनम्

अस्मिन् मासे षोडश-दिनाङ्कात् विंशति-दिनाङ्कपर्यन्तं नवदिल्ल्यां इण्डिया-ए.आइ-इम्पैक्ट-समिट् इति भारत-कृतकबुद्धिमत्ता-प्रभाव-शिखर-सम्मेलनं भविष्यति। अस्मिन् सम्मेलने विश्वस्य शीर्षनेतारः भागं गृहीष्यन्ति। विदेशमन्त्रालयेन उक्तं यत्, फ्रांस-देशस्य राष्ट्रपतिः इमैनुएल मैक्रों, ब्राजीलस्य राष्ट्रपतिः लुईज् इनासिचयो लुला दा सिल्वा, ग्रीसस्य प्रधानमन्त्री क्यारियाकोस् मित्सोताकिस् इत्येतैः सहिताः अन्येऽपि विश्वनेतारः उपस्थिताः भविष्यन्ति।

क्रिकेट्-टी-२०-विश्वकप

अन्ताराष्ट्रिय-पुरुष-विंशतिम्-प्रतिविंशतिः-क्रिकेट्-विश्वचषक-क्रीडायाम्, अद्य प्रातः एकादश-वादने कोलम्बो-नगरे, आयर्लैण्ड्-देशः ओमान-देशं सम्मुखीकरिष्यति । पश्चात् कोलकातानगरे अपराह्ने त्रिवादने इङ्ग्लैण्ड्-देशः स्कॉट्लैण्ड्-दलं सम्मुखीकरिष्यति । सायं सप्तवादने, अहमदाबादनगरे न्यूजीलैण्ड्-दलम् दक्षिण-आफ्रिका-दलम् सम्मुखीकरिष्यति ।